# पञ्चमं प्रकरणम्
# वैदिकवाङ्मये निरुपिता सामाजिकसंरचना

५.१ वैदिकवाङ्मये सामाजिक व्यवस्थापनम् ।

५.१.१ 'समाज' शब्दस्यार्थः ।

५.१.२ समाजस्य स्वरुपम् ।

५.१.३ सामाजिक जीवनम् ।

५.१.४ समाजस्य वर्णव्यवस्था ।

५.२ वैदिकवाङ्मये आश्रमव्यवस्था ।

५.२.१ आश्रमशब्दस्यार्थः ।

५.२.२ आश्रमव्यवस्थायाः उत्पत्तिः ।

५.२.३ चत्वारः आश्रमाः

५.२.४ आश्रमव्यवस्थायाः विकासः

५.३ विवाहः पारिवारिकव्यवस्था च ।

५.३.१ विवाहस्य प्रयोजनानि ।

५.३.२ विवाहस्य सादृश्यम् ।

५.३.३ सगोत्रविवाहस्य निषेधः ।

५.३.४ विवाहस्य प्रकारः

## ५.४ वैदिकवाङ्मये नारीस्थानम्

### ५.४.१ ऋग्वेदोक्तनारीधर्माणां परिशीलनम्

### ५.४.२ वैदिकसमये नार्यः धार्मिकाधिकारः

### ५.४.३ वैदिककाले शिक्षायां नार्यः योगदानम्

### ५.४.४ वैदिकसमये राजनीतौ नार्यः योगदानम्

# पञ्चमं प्रकरणम्
# वैदिकवाऽ्मये निरुपिता सामाजिकसंरचना

## ५.१ वैदिकवाऽ्मये सामाजिक व्यवस्थापनम् ।

कस्यापि राष्ट्रस्य संस्कृतो: वा उन्नति: प्रगतिश्च तस्य सामाजिकव्यवस्थाया: आधारेण भवति । विश्वस्य महती सम्पदा वैदिकवाङ्मयस्य ज्ञान-विज्ञानसमन्विता वैदिकवाङ्मयस्य विचारधारा वर्तते । तस्या: सामाजिकव्यवस्था कीदृशी आसीत् ? सा चेत्थं निरूपयितुं शक्यते । समाजस्य कोऽर्थ: ? समाजस्य स्वरूपं ? कीदृशं समाजजीवनम् ? का च समाजस्य वर्णव्यवस्थाया: वैज्ञानिकरीति: ? सकलानि इमानि प्रश्नानि स्पष्टयितुं शक्यन्ते । यथा -

### ५.१.१ 'समाज' शब्दस्यार्थ:

समाजशब्दस्य निष्पत्ति: 'सम्' उपसर्गपूर्वकात् 'अज्' धातो: सञ्जातास्ति, यस्यार्थ: विद्यते मानवानां समुदाय: । मानवेतरेषां प्राणिनां समुदायस्य 'समाजम् अनुक्त्वा' समुदाय एव कथ्यते । यथा काशिकावृतौ पाणिनिसूत्र 'समुदोरज: पशुषु''[१] । संस्कृत पा.सु.३/३/६

साहित्ये सामाजिकव्यक्तिरूपेण तस्मै एव मान्यता प्रदीयते य: स्वयं जागरूकताद्वारा आदान-प्रदानक्रियाभिश्च समाजस्य रक्षाकर्मणि सामर्थ्यसम्पन्न: स्यात् । एकस्य पाश्चात्यविदुष: मतानुसारं मनुष्याणां सङ्गृहाय अस्मै समुदायस्य संज्ञां प्रदातुं शक्येत, य: सामाजिक सम्बन्धानां कारणत् परस्परं प्रति समीपे सन्ति ।

---

१. संस्कृत पा.सु.३/३/६

By group we man only eallenction of human beings who are brought ino social relationship with another society.

वस्तुतः समाजः केवलं जनानां समुदायमात्रं न विद्यते, अपि तु शरीरस्य विभन्नानि अङ्गानीव समाजस्य सदस्यमध्ये एकः समन्वयः दृश्यते । प्रत्येको जनः अस्य समुदायस्य अथवा समाजस्य एकमेकम् अङ्गं भवति, अङ्गानां च समन्वय एव 'समाजः' जायते । किन्तु समाजस्य सम्बन्धः केवलं मनुष्यमात्रं यावदेव नास्ति, अपितु मनुष्यस्य प्रकृत्या सहापि घनिष्ठः सम्बन्धः विद्यते । मानवजीवनस्य प्रत्येकं क्षेत्रं प्रकृतिः येन केन प्रकारेण प्रत्यक्षेण परोक्षेण वा अवश्यं प्रभावयति । प्रकृतिविरहेण सह मानवस्य कल्पनापि विधातुं न शक्यते । अत एव देशकालयोः वातावरेण सम्बन्धितः मानवानां समुदायः 'समाज' कथयितुं शक्यते । इत्थमत्र समाजशब्दस्य पारिभाषिकं व्यापकार्थः दरीदृश्यते ।

## ५.१.२ समाजस्य स्वरूपम् ।

मनुष्यः एकः सामाजिकः प्राणी वर्तते । स समाजमध्ये एव निवासं कृत्वा सुखपूर्वकं जीवनं यापयति । यदि स निर्जनप्रदेशे चेत् निवासं करोति, तदा सः निश्चेष्टः अकर्मण्यश्च भवितुं शक्यते । समुदाये एव निवासं विधाय, तेन स्वकीयः वंशः परिपन्थिभिः सुरक्षितः विहितो विद्यते । प्राचीनकाले समुदायोऽयं केवलं 'परिवारं यावदेव परिमितः अभवत्, स्त्रीपुरुषाभ्यामुत्पन्नः सन्तानः एव परिवारस्य प्रारम्भिकः स्वरूपमासीत् । सन्तानस्यापि यदा परिवारः सञ्जातः तदा नैके परिवारसमुदायः सम्पद्यते । किन्तु प्रत्येकं परिवाराः स्वतन्त्राः आसन् । तेषां नीति-रीतिः, निवासप्रवासौ, वेशभूषा, अन्नपानं, वाणीवर्तमादयः समग्राः अपि क्रियाकलापाः परस्परं प्रति भिन्नाः अभवन् । परिवारस्य सर्वेभ्यः

शक्तिशाली व्यक्तिरेव तस्य नेता भवति स्म, तथा च परिवारस्य इतरे सदस्याः तस्य अनुयायिनो भवन्ति स्म ।

कालान्तरे यदा तेषां जनानां आवश्यकताः, तेषां च बुद्धिः विकसिता सञ्जाता, तदा तेषु अन्योन्याश्रितस्य निवासस्य प्रवृत्तिः बलवर्ती सञ्जाता । परिणामरूपेण एकस्य सुगठितस्य समाजस्य निर्माणकार्यस्य प्रारम्भः सञ्जातः । तैः च स्थानमेकं सम्मिल्ल्य निवासस्य प्रारम्भः कृतः । अनेन एकस्य सुगठितस्य सुन्दरसमाजस्य संरचना समभवत् ।

सङ्क्षेपेणात्र इत्थं कथयितुं शक्यते यत्, समाजशब्दस्थार्थं विज्ञाय तस्य स्वरुपं मूलतो यावत् विकसितं कथं सञ्जातं, इति सामाजिकं स्वरूपं चिन्तितं विद्यते । उपप्रकरणेऽस्मिन् प्राचीनसमाजादारभ्य विकसितसमाजं यावत् मानवसमाजस्य विकासपद्धतिः सङ्क्षेपतो निरुपिता ।

## ५.१.३ सामाजिकजीवनम् ।

समाजस्य स्वरूपयानन्तरं समाजजीवनं कीदृशं भवेत् इत्याशङ्कायां विचारं कृत्वा चिन्तनमावश्यकमासीत्, अतोऽत्र सामाजिकं जीवनं निरूप्यते ।

मनुष्यस्य सामाजिकं जीवनं सामुदायिकम् अन्योन्याश्रितं भवति । समाजस्य विभिन्नानाम् आवश्यकतानां पूर्तिकरणं सामाजिकव्यक्तेः परमकर्तव्यं भवति, तथा च कर्तव्यस्य भावना एव समाजाय संघटितं, संगठितं वा स्वरूपं प्रदीयते । मनुष्याणाम् आवश्यक्तानुरूपमेव समाजस्य कार्याणि भवन्ति । इत्थं आवश्यकतानुरूपमेव क्रियायाः अपि अनेकरूपत्वं वर्धते । यस्य पूर्तिं विधातुं समाजस्य अतिविस्तृतान् क्रियाकलापान् सुव्यवस्थितं कृत्वा, सुचारुतया सञ्चालनाय, नैकाः सामाजिकाः व्यवस्थाः समायोज्यन्ते, यासु सामाजिकः,

धार्मिकः, दार्शनिकः विविधः दृष्टिकोणः भवति । सामाजिक व्यवस्थायामन्तगर्ताः समाजमध्ये वर्णव्यवस्था, आश्रमव्यवस्था, विवाह परिवारश्च, निवासः, अन्नपानं, स्त्रशिक्षा, समाजे तासां स्थितिः इत्यादयः विस्तृतविचाराः करणीयाः भविष्यन्ति, इति विचिन्त्यात्र तेषां पृथक् पृथक' समीक्ष्य इत्थं प्रस्तोतुं शक्यते ।

### ५.१.४ समाजस्य वर्णव्यवस्था ।

वैदिककाले वर्णव्यवस्था राष्ट्रस्यास्य संस्कृतेः सामाजिकसंघटनायाश्च प्राणशक्ति – स्वरूपिणी आसीत्, तस्मिन्नेव समये भारतस्य आर्यैः, समाजस्य चतुःषु भागेषु विभाजनमकारि । विभाजनस्यायस्य नैके दृष्टिकोणाः अभवन् । अर्थशास्त्रीयायाः दृष्ट्याः अनुसारं साधारणतया विभाजनमिदं श्रमविभाजनाधारेण विहितमभवत् । वैदिककाले आर्यैः स्वकीयानां सामाजिकानाम् आर्थिकानाञ्च समस्यानां समाधनार्थं श्रम-विभाजनस्य सिद्धान्तः स्वीकृतः । यैः जनैः अध्ययनाध्यापनयोः, पौरोहित्यकर्मणि च मनः समाहितं, ते ब्राह्मण; ये शासनसम्बन्धिनि तथा युद्धसम्बन्धिनि कार्ये निरताः आसन्, ते क्षत्रियः, कृषौ, पशुपालने, व्यापारोद्यगव्यवसायादिषु च यैः मनः समाहितं, ते वैश्यः इति वर्णेन प्रसिद्धः, ये च सेवाकार्ये निरताः अभवन् ते शुद्राः सञ्जाताः । प्रारम्भे ते वर्गरूपेण आसन्, किन्तु पश्चात् ते 'वर्ण' इति पदेन परिचितः सञ्जातः ।[१]

ऋग्वेदसंहितायां समाजाय पुरुषस्य स्वरूपं प्रदत्तमस्ति, तस्य भिन्नविभिन्नानाम् अङ्गानां वर्णनमपि कृतमस्ति, यथा आधुनिकाः समाजशास्त्रस्य विद्वांसः मानवसमाजं सजीव-शरीरधारिरूपेण आमनन्ति । तथैव ऋग्वेदेऽपि जीवितपुरुषः अभिमतोऽस्ति । समुदायस्य जागृतेश्च भावान् प्रकटयितुं जागृतिरेव ऋग्वेदसंहितायां पुरुषसूक्ते समाजः पुरुषरुपेण वर्णितोऽस्ति । तस्य समाजरुपिणः

१ प्राचीन भारतीय सामाजिक आर्थिक समस्याएँ, पृ.२६

पुरुषस्य चत्वारि अङ्गानि दर्शितानि सन्ति – ब्राह्मणः, क्षत्रियः, वैश्य, शुद्रश्च । येषामुत्पत्तिः तस्य विराट्पुरुषस्य, शरीरादभवत् । मुखात् ब्राह्मणः, भुजाभ्यां क्षत्रियः, जङ्घाभ्यां वैश्यः, पद्भ्यां च शूद्रः । वेदस्य पठनं पाठनं, यजनं याजनं, यमनियमादिसाधनाकरणं ब्राह्मणस्य कार्याणि आसन् । प्रजानां संरक्षणं, दानकरणं, यज्ञकरणं, अध्ययनं, युद्धादीनि क्षत्रियाणां कर्तव्यानि अभवन् । कृषिः, पशुपालनं, वाणिज्यादि वैश्यानां मुख्यकार्याणि, समाजस्य च सेवाकरणं शूद्राणां मुख्यकर्तव्यमासीत् ।

वर्णः सामाजिकविभाजनस्य व्यवस्था वर्तते । यस्याः आधारः जन्मनः अपेक्षया कर्मणामाधिक्येन वर्तते, कर्मणां विभाजनं रङ्गास्य आधारेण विधातुं न शक्यते । विभाजनस्यास्य आधारः गुणैः, प्राकृतिकस्वभावेन्, प्रवृत्तिभिश्चापि कर्तुं शक्यते । सामाजिकव्यवस्था, संगठनं च परिपोषयितुमिदं आवश्यकमस्ति यत् सामाजिक-कार्याणां विभाजनमेतादृशं स्यात्, येन एकस्य कार्ये अपरस्य व्यक्तेः अनावश्यकं विध्नकरणं न भवेत् । इदमेव लक्ष्यीकृत्य गुणानां कर्मणां वा आधारेण समाजस्य सदस्यान् विभिन्नेषु समुदायेषु विभाजनस्य या व्यवस्था प्रारब्धा, सा व्यवस्था 'वर्णव्यवस्था' इति सञ्ज्ञया विख्याता जाता । अवसरानुसारमत्र निरूपितं, पूर्वेऽपि सम्यक्तया विषयोऽयं समीक्ष्य प्रतिपादितोऽस्ति ।

## ५.३ वैदिकवाङ्मये आश्रमव्यवस्था ।

वैदिकवाङ्मये वर्णव्यवस्थायाः सम्यक् वर्णनं मानवानां सामाजिकावस्थानुसारं विहितं विद्यते । तत्र वैदिकवाङ्मये वेदकालीने च मानवानां प्राचीनसंस्कृतेः संस्कारानुसारं च कीदृशी कर्मानुसारिणी, गुणानुसारिणी वर्णव्यस्था आसीदिति प्रतिपादितास्ति । किन्तु प्रकरणेऽस्मिन् मानवानां जीवनकाले तेषां

समयानुसारं आयोरनुसारं यथासमयं कीदृशं जीवनं भवेदिति आश्रमव्यवस्थायां सम्यक्तया विचिन्त्य  विज्ञातुं शक्यते । सा च आश्रमव्यवस्था इत्थं प्रकारेण संशोध्य वर्णयितुं शक्नुमः ।

### ५.२.१ 'आश्रम' शब्दस्यार्थः ।

'आश्रम' शब्दः संस्कृतभाषायाः 'श्रम्' धातोः "आ" उपसर्ग संयोज्य निष्पन्नो भवति । यस्यार्थ परिश्रमः, प्रयासो वा जायते । आश्रमेण शब्देन स्थानस्यापि बोधो जायते । कथम् ? तर्हि प्रत्येकेषां क्रियाणां एकं कार्यस्थलं, स्थानं वा आवश्यकरुपेण भवति । प्रत्येकं सामाजिकप्राणिनः सामाजिकपरिस्थितिावेव कार्यं कुर्वन्ति न तु निर्जनस्थितिमध्ये । इत्थं आश्रमान्तर्गता प्रयासस्य क्रिया सम्मिलिता विद्यते । प्रयासोऽयं लक्ष्यसय प्राप्तिहेतुः विधीयते, लक्ष्यं च जीवनलक्ष्यमस्ति । लक्ष्यस्य प्राप्तिरेव मनसि निधाय आश्रमविभाजनं विहितमस्ति । उदाहरणार्थं यथा – ब्रह्मचर्याश्रमस्य उदेश्यः ज्ञानोपलब्धिः विद्यते । गृहस्थाश्रमस्य गृहे निवासं विधाय गृहकार्याणि कर्तव्यानि भवन्ति । वानप्रस्थाश्रमे तपश्चरणं विद्यते । संन्यासाश्रमेऽपि सर्वकर्मभ्यः उपरतो र्भत्वा केवलं मोक्षमार्गस्य चिन्तनं करणीयं भवति । इत्थं आश्रमशब्दस्य स्पष्टार्थं विज्ञाप्य आश्रमव्यवस्थायाः विशदं प्रादुर्भावविकासादिविवेचनं यज्ञारूपं निरूपयितुं शक्यते ।

### ५.२.२. आश्रमव्यवस्थायाः उत्पत्तिः

व्यवस्थेयं केनोत्पादिता, कदा सर्जिता सम्बन्धेऽस्मिन् अद्यावधिं यावत् किमपि निश्चितं प्रमाणमधिगतं नास्ति । इदमवश्यं कथयितुं शक्नुमः यत् आश्रमव्यवस्था वैदिककालस्य सांस्कृतिकप्रतिभायाः एव एकमङ्गमभवत् । वैदिक समये ज्ञानार्जनाय, शक्तिव्यापाराय, मोक्षस्य कृते विज्ञजनाः पूर्णरूपेण चिन्तनं कुर्वन्ति स्म । एतादृशाः ऋषयः, महर्षयश्व समयेऽस्मिन् ज्ञानकर्मणोः समानरूपेण

अपेक्षां कुर्वन्ति स्म । तथा च परमात्मानं निखिलज्ञानस्य कर्मणश्च समष्टिं स्वीकृत्य, मनुष्याणां वैयक्तिकजीवनेऽपि ज्ञानकर्मणोः परिपूर्णतां प्रापयितुं विशेषं चिन्तनं विहितं विहितं विद्यते । अस्य परिणामरूपेण आश्रमव्यवस्थायां यस्यां ब्रह्मचर्यः, संन्यासाश्रमश्च ज्ञानार्जनप्रधानः आसीत् ।वेदेषु ानवः शतायुः स्वीकृतः र्वते । यत्र पञ्चाशत् वर्षाणि च पर्यन्तं कर्मार्जमस्य कर्तव्यं निश्चितं कृतमीसत । अन्ते ज्ञानकर्मणोः पीसमाप्तौ सत्यां परमात्मानि लीनम् अर्थात्द मौक्षप्राप्तेः प्रयासः कर्तव्योऽभवत् । आश्रम्व्यवस्थिायाः इदमेवैकं प्रमुखकारणं, असेन्पतेश्वापि कारणं भवेत् ।

### ५.२.३ चत्वारः आश्रमः

जीवनस्य अत्यन्तः व्यवस्थितः, नियमितश्च क्रमः – सनातनधर्मस्य विशेषतास्ति । अस्य पूर्णरूपेण परिपालयितुं सम्पूर्णजीवनस्य निश्चितक्रमः निबद्धः कर्तव्यः । क्रमोऽयं एतादृशो भवेत्, यत्र मानवानां समस्त कार्याणि विभिन्नरूपेण विकसितुम् अवसरम् उपलभ्येत, जीवनस्य च प्रत्येकं भागेभ्यः समुचितकार्यं शिक्षां च प्राप्येत । यात्रायां यथा विश्रान्तिहेतवे विभिन्नानि स्थानानि, तथैव अस्याः जीवनयात्रायाः कृते चतुर्णाम् आश्रमाणां परिकल्पना कृतासीत्, प्रत्येकञ्च जनैः आश्रमेषु एतेषु प्रवेशः अवश्यं करणीयोऽभवत् । वर्णव्यवस्थामिव आश्रमव्यवस्थायि समाजं स्वकीयं उदिष्टस्थानं यावत्, प्रापयित्वा, मानवं वास्तकिं मानवं निर्माप्य, तस्य चरमलक्ष्यं ब्रह्मप्राप्तिं यावत् गमयति स्म । ते चत्वारः आश्रमाः इत्थं सन्ति । यथा –

ब्रह्मचारी गृहस्थश्च ।
वानप्रस्थो यति : तथा ।

एते गृहस्थप्रभवाः ।

चत्वारः पृथाश्रमाः ॥[1] मनु.६/८७

अर्थात् गृहस्थाश्रमात् प्रादुर्भूताः चत्वारः आश्रमाः निरूपिताः सन्ति मनुना – (१) ब्रह्ममचर्यः (२) गृहस्थः (३) वानप्रस्थ (४) संन्यासश्च

**(१) ब्रह्मचर्याश्रमः ।**

"ब्रह्मचर्य" शब्दः द्वौ शब्दौ सम्मेल्ल्य निर्मितोऽस्ति – 'ब्रह्म' तथा 'चर्य' । 'ब्रह्म' इत्यस्यार्थोऽस्ति महान्, तथा 'चर्य' इत्यस्यार्थः वर्तते विचारशीलत्वम् । अर्थात् ब्रह्मचर्यस्य तात्पर्यमस्ति यत् एतादृशं मार्गमुपरि गन्तव्यं येन मानवः शारीरिक्याः, मानसिक्याः, आध्यात्मिक्याश्च दृष्ट्या लघुरपि महान् भवितुं शक्येत । केचन जनाः ब्रह्मचर्यस्य अर्थः केवलं "इन्द्रिय–संयमः" कुर्वन्ति, तदुचितं नास्ति । शुद्धार्थस्तु क्षुद्रतातः 'महान्' विकासस्यैव वर्तते ।

ब्रह्मचर्यस्य धारणकर्ता एव प्रकाशमानं ज्ञान–विज्ञानं धारयति । तत्र समस्तदेवाः निवसन्ति । ब्रह्मचारी श्रमेण तपसा च मुक्तजीवनेन समस्तजनसमुदायं पुष्णाति । ब्रह्मचर्यस्य तपसा एव राजा स्वकीयस्य राष्ट्रस्य रक्षायै सामर्थ्यवान् भवति । ब्रह्मचर्येण आचार्यः शिष्येषु शिक्षायाः योग्यता आत्मनि सम्पादयति । अथर्ववेदस्य एकादशकाण्डस्य पञ्चमसुक्तानुसारं "ब्रह्मचारी तपसा मृत्योरुपर्यपि विजयं प्राप्तुं शक्नोति" । यथा –

ब्रह्मचारी ब्रह्मभाजद् बिभर्ति[2]

तस्मिन् देवा अधिविश्वे समवेताः ॥ अथर्व. ११/५/२४

ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति ।

आचार्ये ब्रह्मचर्येण ब्रह्मचारिण मिच्छते ॥[3] अथर्व. ११/१/१७

---

१. मनु.–६–८७

२. अथर्व. ११/५/२४

३. अथर्व. ११/१/१७

देवराजेन इन्द्रेणापि ब्रह्मचर्येणद्वारा एव स्वर्गस्य शासनमुपलब्धम् । अर्थात् ब्रह्मचर्याश्रमस्य महत्वं न केवलं मानवानां कृतेऽपि तु देवानां कृतेऽपि वर्तते ।

ब्रह्मचर्येण तपसा देवा मृत्युमपध्नत ।
इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्वराभरत् ॥[१] अथर्व. ११/५/१९

इत्थं श्रमं तपस्याश्चोपरि आधारितस्य ब्रह्मचर्याश्रमस्योद्भावना वैदिकधारायाः व्यापकदृष्टेः एकं समुज्जवलां प्रमाणं वर्तते नितराम् ।

उपनयनसंस्कारानन्तरं बालकः जीवनस्य प्रथमे ब्रह्मचर्योश्रमे प्रवेशं करोति । संस्कारोऽयं मानवाय अनुशासितं जीवनं यापयितुं निमन्त्रणं सम्प्रददाति । उपनयनसंस्कारस्य वर्णानुसारं पृथक्-पृथक् आयुषोऽनुरुपं विधानं वर्तते । यथा--ब्राह्मणस्य अष्टमवर्षे, क्षत्रियस्य एकादशमवर्षे, तथा वैश्यस्य द्वादशवर्षे उपनयनसंस्कारस्य विधानं वर्तते । शूद्रस्य कृते उपन्यनसंस्कारस्य विधानं तथा गुरूकुलनिवासस्य विधानं नास्ति । उपनयनसंस्कारस्य पश्चात् बालकस्य विद्यार्जनस्य कृते गुरूकुलं प्रति गमनं कारयन्ति स्म । गुरुकुले आचार्यद्वारा ब्रह्मणाय धर्मशास्त्रस्य, क्षत्रियाय शस्त्रस्य, तथा वैश्याय व्यापार-वाणिज्यस्य शिक्षां प्रददाति स्म । शिष्येण गुरुकुले गुरोः सेवा अपि कर्तव्या भवति। शिष्यः गुरुवरस्य पशूनां संरक्षणं, संवर्धनञ्च करोति स्म, गुरोः यज्ञस्यार्थं वनात् समिधश्चानयति स्म । भोजनार्थं नित्यं ग्रामेषु भिक्षार्थं अगच्छत् । भिक्षायाः प्राप्तमन्नं गुरवे निवेद्यते स्म । गुरुःयत ददाति स्म, तत्र हि सः सन्तुष्टः तिष्ठति ।

---

१. अथर्व-११/५/१९

छात्रस्य सम्पूर्णदिनम् अध्ययने गुरोश्च सेवायां व्यतीतं भवति स्म । सायं, प्रातः सन्ध्यावन्दनमवश्यं करणीयमभवत् ।

मनुस्मृत्यनुसारं ब्रह्मचारिणा मदिरा-मांसः सुगन्धिद्रव्यं, माला, स्वादिष्टभोजनं, स्त्री, अम्लपदार्थः तथा जीवहिंसायाः परित्यागः कर्तव्यः । ब्रह्मचारिण सर्वेन्द्रियाणि संयम्य, मनः नियन्त्रितं कृत्वा, स्वकीयं शरीरं दुर्बलं न कृत्वा, योगेन सर्वार्थान् साध्येत । छान्दोभ्यो पनिषदानुसारं, यज्ञकर्म, निर्धनाय भोजनं, वने निवसनमित्यादि ब्रह्मचर्ये समागच्छन्ति, ब्रह्मणः तृतीयस्वर्गः इत्थमेवोपलभ्यते ।

इत्थं अध्ययने, कठोर ब्रह्मचर्ये च स्वीयम् अध्ययकालं समाप्य, छात्रः स्वकीयायाः योग्यतानुसारं दक्षिणादानं कुर्वाणः आसीत् । गुरोराज्ञानुसारञ्च सः जीवनस्य द्वितीयस्तरे पदार्पणं करोति स्म । गुरोः निर्गम्य पुनः गृहागमनात्मकः संस्कारः "समावर्तन" संस्कारः कथ्यते । गृहमागत्य वैवाहिकं कार्यं सम्पाद्य गृहस्थाश्रम प्रविशित स्म ।

इत्थमत्र वैदिकवाङ्मये जीवनस्य ज्ञानप्रधानं ब्रह्मचर्याश्रमं यथातथं प्रतिपाद्य अपरस्य गृहस्थाश्रमस्य का रीति ? किं कर्तव्यमित्यादिकम् इतोऽनन्तरं निरूप्यते ।

## (२) गृहस्थाश्रमः ।

गृहस्थाश्रमः अन्येभ्यः समस्ताश्रमेभ्योऽधिकं महत्वपूर्णः तथेतरेषां समेषाम् आश्रमाणाम् आधारो वर्तते । वशिष्ठसूत्रानुसारं यथा सर्वाः लध्व्यः महत्यश्च नद्यः सागरं संगत्य विश्रामं लभन्ते, तथैव सर्वाश्रमिणः मानवाः गृहस्थाश्रमस्य आश्रिताः भूत्वा निवसन्ति । यथा- बालका स्वीयायाः मातुः रक्षायामेव सुरक्षिताः भवन्ति, तथा सर्वे भिक्षुकाः, संन्यासिनश्च गृहस्थिनामेव

रक्षायां वसन्ति । बौद्धायनस्य मतानुसारं वस्तुतः केवलमेक एव आश्रमोऽस्ति, सः गृहस्थाश्रमः । ब्रह्मचर्यमस्य आयोजनमात्रमस्ति । वानप्रस्थः, संन्यासश्च गृहस्थधर्मस्य शिक्षाप्रदायकः, जीवनपालनस्य च निर्देशकश्च वर्तते । आश्रमाणामितरेषां भरणपोषणकरणात् अयमाश्रमः ज्येष्ठः श्रेष्ठश्चास्ति । यः गृहस्थः जनः नैरन्तर्येण स्वधर्मस्य पालनं करोति, सः कुरूक्षेत्रं, नैमिषारण्यं, हरिद्वारं, केदार तीर्थमादि सर्वं गृहे स्थित्वा एव प्राप्नोति, येषां यात्रां विधाय सः सर्वपायैः प्रमुच्यते ।

धनस्य संग्रहकरणं तस्य च यथानुकुलां विभाज्य सन्तानोत्पादनं, तस्य च परिपालनं परमं कर्तव्यं विद्यते । अतिथिसत्कारः तस्य प्रधानकर्तव्येषु एकोऽस्ति । तेन कदापि कार्येऽस्मिन् क्षतिः न करणीया । तृणं, भूमिः, जलं तथा मधुरं सत्यवचनं चत्वारि वस्तूनि इमानि समेषां गृहस्थिनां गृहे अवश्यमेवोपलभ्यन्ते । अतिथिभ्यः, ब्राह्मणसम्बन्धिभ्यः, भृत्येभ्यश्च सदैव आदौ भोजनं कारयेत् । ततः पतिपत्न्यो भोजनं कर्तव्यम् । तत्पूर्वं पक्षिभ्यः, वालेभ्यः, रोगिभ्यः, सगर्भाभ्यः, स्त्रीभ्यः भोजनं दातव्यम् ।

गृहस्थिभिः पञ्च महायज्ञाः (ब्रह्मयज्ञः पितृयज्ञः, देवयज्ञः, भूतयज्ञः तथा नृयज्ञः) सम्यक्तया अवश्यं करणीयाः । प्रथमत्रयाणां यज्ञानां करणेन मनुष्यः ऋणत्रयेभ्यः (ऋषिऋणं, पितृऋणं, देवऋणञ्च) मुक्तो भवति । नित्यं पठनपाठनाभ्यां, ब्रह्मयज्ञेनः, पितृतर्पणेन, श्राद्धद्वारा, पितृयज्ञेन, गार्हपत्याग्निसेवनेन, देवयज्ञेन, प्रेतात्मेभ्यः बलिभोजनेन, कीटादिभ्यः असशक्तामानवेभ्य, अस्पृश्यजातिभ्यश्च भोजनदानेन भूतयज्ञः, आतिथ्यसत्कारेण नृयज्ञः सम्पद्यते । इमे सर्वे यज्ञाः गृहस्थाश्रमे निवासं कृत्वा पत्नी पुत्रादीनां सहाय्येन सम्पादयितुं शक्यन्ते । अतो हि आश्रमोऽयं सर्वोत्तमः वर्तते ।

इत्थं वैयक्तिकं, सामाजिकं, आर्थिकं, नैतिकं तथा धार्मिकं सर्वदृष्टया गृहस्थाश्रमस्य महत्वं सर्वोपरि वर्तते । गृहस्थमेकं पञ्चमहायज्ञेन नित्यकार्येण प्रतिबन्धितमेतदर्थं कृतवान्नस्ति, सः स्वकीयपरिवारस्येतरसदस्यान् पोषयन्, मनुष्यमात्रं प्रति स्वीयकर्तव्यानि परिपालयेत्, शनैः शनैश्च पञ्चमहायज्ञेन, अन्यधार्मिकाचरणेन धर्माचरणं कुर्वाणः भवेत् । कथम् ? धर्मार्थकाममोक्षाणां चतुर्वर्गाणां प्राप्तिः । तस्य जीवनस्य मुख्यध्येयमस्ति ।

इत्थमत्र द्वितीयाश्रमस्य प्रारम्भान्तं सम्यक् विचार्य समीक्ष्य निरूपणं विहितं विद्यते । इतोऽप्यग्रे सविशदं निरूपयितुं शक्यते, किन्तु अति विस्तारभयादत्रैव पर्याप्तं मन्यते ।

**(३) वानप्रस्थाश्रमः ।**

पञ्चविंशतिः वर्षाणि यावत् गृहस्थाश्रमे निवासं विधाय पश्चात्, पञ्चाशत्वर्षस्य आयुः समाप्य वानप्रस्थाश्रमे प्रवेशस्य समयः आगच्छति । वानप्रस्थावस्थां यापयितुं वनगमनं कर्तव्यं भवति । वने तेन सह स्त्री अपि गन्तुं शक्नोति, यदि बालकाः लघवः न स्युः, तेषाञ्च पालनकर्ता गृहेऽन्य कोऽपि न स्यात्तर्हि सा गृहे निवासं विधातुं शक्नोति । वनगमनस्य समये सः स्वकीयेन सह पवित्राग्निं, यज्ञोपकरणानि च नीत्वा गच्छति । समयेऽस्मिन् तस्य कर्तव्यं वर्तते यत् सः यज्ञेन, प्रार्थनया च संसारस्य सहाप्यं कुर्यात् । यज्ञः अध्ययनं, पवित्रता तथा सर्वजीवान् प्रति दयाभाव तस्य जीवनस्य मुख्य नियमाः सन्ति । वने उषित्वा तेन नित्यं स्वाध्यायः विधातव्यः । इन्द्रियाणां दमनं करणीयं, सर्वैः सह मित्रताव्यवहारः, सदा दानं दातव्यम्, अपरिग्रहः, दयाभावः च भवेत् ।

वानप्रस्थी स्वीयपरिवारस्य सदस्यं न भूत्वा समग्रसमाजस्य सदस्यो भवति स्म । स्वीयैः समस्तकर्मभिश्च समाजस्य कल्याणं विधातुं प्रयत्नं करोति स्म । कार्याणीमानि कुर्वन् वानप्रस्थी सत्यसंशोधने तथा आध्यात्मिकज्ञानप्राप्तौ सततं प्रयत्नशीलः भवति स्म । अतः सः सांसारिकसुखानि परित्यज्य इन्द्रियाणि संयन्तुं प्रयत्नमकरोत् । वानप्रस्थी कस्यापि गृहस्य, उटजस्य वा आश्रयं न गृहीत्वा भूमिप्राङ्गणे निवसनम्, षड्तुषु ऋतुविपरीतवस्तूनां सेवनमकरोत् । यथा वर्षाकाले मुक्तभूमौ निवासः, शीतकाले जले स्थित्वा तपः, ग्रीष्मकाले पञ्चाग्नितपनम्, इत्यादि सततं तपसा सः आत्मचिन्तमकरोत् । कासुचित् परम्परासु सः वने कुटीरं निर्माय अवसत् । तस्याश्रमः गुरूकुले मुच्यते । तस्याश्रमे छात्राः वेदाध्ययनाय आगच्छन्व तेषां आश्रमे नित्यम् अध्ययनाध्यायनाभ्यां ध्यानेन, चिन्तने च आत्मपरमात्मनौः, इहलोकपरलोकयोश्च सम्बन्धितानां गूढरहस्यानां चर्चाः भवन्ति स्म । सत्यस्य ज्ञानस्य च शोधनमेव तेषां जीवनस्य चरमलक्ष्यमभवत् ।

इत्थम् आत्मनियन्त्रणेन, आत्मीयतया, दाने, समस्तप्राणिनां प्रति दयाभावेन, सदाचारयुक्तेन च परिपूर्णः वानप्रस्थी आसीत् । मानवातायाः इयमेव विस्तृता कल्पना तथ्यमिदं स्पष्टीकरोति यत् सांसारिकं सुखं आध्यात्मिकसुखापेक्षया क्षुद्रस्तरीयं वर्तते । जीवनस्य चरमलाक्ष्यं परमसत्यस्य प्राप्तिः वर्तते, कथम् ? तर्हि लौकिकजीवनस्य अपेक्षया पारलौकिकं जीवनमधिकं वैशिष्ट्यपूर्णं तथा आकर्षकं मन्यते ।

### (४) संन्यासाश्रमः ।

पञ्चसप्ततिवर्षान्तरं वानप्रस्थी संन्यासस्य जीवनं स्वीकरोति स्म । जीवनेऽस्मिन् तेन सर्वमपि परित्याज्यम् अभवत् । कर्मणां त्यागेन सह सह तेन सामाजिकनाम यावदपि त्यक्तव्यमभवत् । संन्यासिरूपेण तस्यापरं नामकरण

भवति, सश्च तस्य शेषजीवनं परोपकारे यापयति स्म । संन्यासाश्रमे मानवेन तपसः, त्यागस्य, संयमस्य चरमादशः समक्षं स्थापनीयमास्ति । स पूर्णतया अकिञ्चनं भूत्वा भैक्ष्येण जीवननिर्वाहमकरोत् । स्र्वासामिच्छानां, वासनानाम् आकाक्षानाञ्च परित्यागं विधाय मोक्षोपलब्धये प्रयन्तशीलोऽभवत् । मनोरनुसारं संन्यासी मृत्योः जीवनस्य चाकाङ्क्षा न कुर्यात् । स्वकीयदृष्ट्या विलोक्य सः पृथ्व्यां पादौ धारयेत् । वस्त्रपूतं जलं पिबेत्, सत्यदूतं वदेत वाक्यम्, मनःपूतं समाचरेत्, क्रौध क्रोधिनमुपरि क्रोधं न कुर्यात्, सः आत्मनि एव आनन्दमनुभवेत्, उदासीनः स्यात्, कस्यापि वस्तुनः अपेक्षां न विदध्यात्, मांसं न भक्षयेत्, आत्मानमेव सहायकं विधाय पृथिव्यां सुखपूर्वकं मुक्तीच्छया विचरेत् । पुनर्जन्म, दुःखं, सर्वेषु लघुगुरूषु ब्रह्मव्यापकत्वं, समेषामेतेषां निरन्तरं विचारयेत् । नैकेषु जन्मसु जीवात्मान संशोधयेत्, केवलं ब्रह्मणि रमेत । इत्थं सः तल्लक्ष्यं प्राप्तुं समर्थोऽस्ति, स च मानवजीवनस्य परममन्तिमं मोक्षसञ्ज्ञकं प्राप्तुं शक्नोति ।

**५.२.४ आश्रमव्यवस्थाया ।**

चतुर्ष्णाम् आश्रमाणामुल्लेखः स्पष्टरूपेण वैदिकसाहित्ये नोपलभ्यते, किन्तु, 'ब्रह्मचर्यं', तथा 'ब्रह्मचारी' शब्दयोः प्रयोगः नैकेषु स्थलेषु प्राप्यते । संन्यासिनः अर्थे 'यति' शब्दस्यापि प्रयोगः प्राप्यते । गृहस्थस्य कृते ऋग्वेदे 'गृहपति' शब्दप्रयोग लभ्यते । वैदिकसंहितायाः अतिरिक्तं ब्राह्मणग्रन्थेषु, आरण्यकेषु, उपनिषत्सु चतुर्ण्णामाश्रमार्णा सत्तायाः नैके सङ्केताः विद्यमानाः सन्ति । ऐतरेयब्राह्मणे यथा –

> ब्रह्मचर्याश्रमं समाप्य गहीभवेत्, गृही भूत्वा[१]
>
> वनी भवेत्, वनीभूत्वा प्रव्रजेत" – ऐतरेयब्राह्मण

---

**१ ऐतरेयब्राह्मण**

ब्राह्मणकालानन्तरम् उपनिषत्कालं प्रारम्भं बोभूवन् आश्रमव्यवस्थाया पूर्णरूपेण विकासः सञ्जातः आसीत् । बौद्धायनसूत्रानुसारं प्रहलादस्य पुत्रेण कपिलेन आश्रमव्यवस्थायाः प्रारम्भः कृतोऽभवत् । तत्र चतुण्णामाश्रमाणां वर्णनं विस्तरेण कृतमभवत् । वस्तुतः मनुष्यः स्वकीयजीवने कस्मिन् आयुषि किं कार्य सम्पादयेन् ? तस्य स्पष्टरूपेण निरूपणं विधातुमेव मानवजीवनं चतुर्धा विभक्तमकरोत । तस्मै च ब्रह्मचर्यं, गृहस्थ, वानप्रस्थं, संन्यासञ्चाभिधानं प्रदत्तम्, तस्य कार्याणां निर्धारणं कृतम् । मानवाः स्वं स्वं वर्णधर्मं परिपालयेयुः तदर्थं पथप्रदर्शनं कृतम्, स्वीयं लक्ष्यं च प्राप्नुयुः । इमाः सामाजिकव्यवस्थाः मनसि निधाय एव आश्रम आश्रमव्यवस्थायाः विकासः नैतिकेन, धार्मिकेन च आधारेण सुदृढतया विहितोऽस्ति ।

### ५.३ विवाहः पारिवारिकव्यवस्था च ।

वैदिककाल 'विवाह' एकं धार्मिकं कृत्यममन्यत् । मानवजीवनं उपर्युक्तेषु चतुःषु आश्रमेषु विभाजिनं विद्यते । तत्र गृहस्थाश्रमजीवनं विवाहमुपरि एव आधारितमस्ति । अतः विध्यनुसारं विवाहसंस्कारं विधाय गृहस्थाश्रमे प्रवेशः एव नरनार्योः धार्मिकं कर्तव्यं मनुते स्म । शतपथब्राह्मणानुसारं जाया (स्त्री) पुरूषस्य अध (अर्धभागं) भवति । यावत् जायां विना प्राप्य पुरूषः सन्तानं नोत्यादयति । अर्थात् जायां प्राप्य एव पुरूषः सन्तानमुत्पादयति, तदा अर्धं न भूत्वा पूर्णत्वमुपलभते । प्रत्येकं जनः त्रिभिः ऋणैः सह उत्पद्यते – देवऋणं, ऋषि–ऋणं, पितृऋणञ्च । ऋणत्रयेषु एतेषु पितृऋणात् ऋणं भवितुं, आवश्यकमस्ति यत् मनुष्यः विवाहं विधाय प्रजामुत्पादयेत् । तैत्तिरीयब्राह्मणानुसारं पत्नीरहितः पुरूषः यज्ञं विधातुं अधिकारी न भवति । धार्मिकानुष्ठानेषु पत्न्याः उपस्थितिः अत्यधिकं महत्वपूर्णा विद्यते । अतो हि सहधर्मिणी, अर्धांगनी अपि उच्यते स्म । पतिपत्न्योः सम्बन्धः पवित्रः शाश्वतश्चासीत् ।

### ५.३.१ विवाहस्य प्रयोजनानि ।

अन्यस्मिन् एकस्मिन मन्त्रे पत्नी दशपुत्राणां जन्मदात्री स्यादिति प्रार्थना विहितास्ति ।

दशास्यां पुत्रानाधहि पतिमेकादशं कृधि ।[१]

ऋग्वेद १०/८५/४५

तस्मिन् समये पत्न्याः वीरस्य सुयोग्यस्य च सन्तानस्य प्राप्तेः कामना भवति स्म । सहैव रतिः इन्द्रियसुखमपि विवाहस्य अन्यप्रयोजनमभवत् । उपनिषत्सु ऐन्द्रियसुखं ब्रह्मानन्दसुखसमानं वर्णितमस्ति ।

मनुस्मृतेः अनुसारं सन्तानं, धर्मकार्यं, रतिः स्वर्गप्राप्तिश्च दाराधीनं (पत्न्या अधीनम्) विद्यते ।

अपत्यं धर्मकार्याणि, शुश्रूषा रतिरुतमा ।[२]
दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च ॥ मनु.९/२८

अतः प्रत्येकं जनैः विवाहबन्धने बद्धवाएतस्याः प्राप्तिः कर्तव्यासीत् । विवाहं कृत्वा यदाः मानवः सदगृहस्थं भूत्वा धर्मपालनं, धर्मानुकूलमर्थोपार्जनं, तथा धर्मानुगतकामसेवनं करोति, तदा सः सांसारिकमभ्युदयं सम्प्राप्य, सश्च स्वर्गं प्राप्तं समर्थों भवति ।

विवाहानन्तरं वैदिकयुगे स्त्रीपुरूषौ केन प्रकारेण पारिवारिकं जीवनं यापयतः स्म । ऋग्वेदेऽस्य अतीव सुन्दरं वर्णनं स्पष्टतया दृश्यते । यथा त्वमत्र गृहेऽस्मिन् वसेतु, कदाचिदपि वियुक्तो न भवेत् । स्वकीये गृहेऽस्मिन् पुत्राः प्रपौत्राश्च सहैव कीडन्तः आनन्दं च कुर्वन्तः सम्पूर्णायुः यावत् वसन्तु । यथा–

१. ऋग्वेद–१०/८५/४५
२. मनु.९/२८

इहैवस्तुमावियौष्टं ।

विश्वमा युर्व्यश्नुतम् ।

क्रीडन्तौ पुत्रेर्नपुभि

मोदमानौ  स्वे गृहे ॥[१] ऋ.१०/८५/४२

इतोऽप्यग्रे शिक्षिताः अशिक्षिताश्च द्विप्रकारकाः अपि जनाः स्वीयानां पुत्राणां प्रपौत्राणां कृते पोषणाय स्वकीयानां सुखानां त्यागं कुर्वन्ति स्म । प्रत्येकं पितृणां इच्छा भवति स्म यत्, स्वयं कथमपि वसेत्, किन्तु तस्य सन्ततिः चारू भक्षयेन्, चाक पिबेत्, अर्थात् सन्ततेः सुखाय स्वस्य सुखस्य कामना नाभवत् । इदं त्यागरूपं कर्म हि वास्तविकं स्वर्गसुखमस्ति ।

पत्न्याः परिवारे किं महत्वमभवत्, अस्य अनुमान ऋग्वेदस्य कथनादुपलभ्यते । स्त्री स्वस्य श्वसरं, ननन्दरं आदीनामुपरि साम्राज्ञी इव शासनं कुर्यात् । परिवारे स्त्रीपुरूषयोः समाना स्थितिः आसीत् । अहं ज्ञानी वर्ते त्वमपि तद्वत ज्ञानवती असि । अहं साम, त्वं ऋक्, अहं द्यौः त्वं पृथिवी असि, आवां द्वौ सम्मिल्ल्य वसेतां, सन्तानम् उत्पादयेव । समस्तपरिवारः इत्थं वर्तयेत् । यथा –

अनुव्रतः पितुः  पुत्रः

मात्रा भवतु संमनाः ।

जाया पत्ये मधुमतीं

वाचं वदतु शान्तिवाम् ॥[२]

अथर्व.३/३०/१

---

१. ऋ.१०/८५/४२
२. अथर्व.३/३०/१

इत्थमत्र परिवारस्य पारस्परिक सौहार्द भवेदिति वर्णितम् ।

परिवारे पतिपत्न्योः समानस्थानात् स्त्री धार्मिककर्मकाण्डे कार्यं करोति स्म । पत्या सह यज्ञानुष्ठानस्य अधिकारः सम्प्राप्तः आसीत् ।

**५.३.२ विवाहस्य सादृश्यम् ।**

वैदिककाले विवाहस्य सम्बन्धं स्थापयितुं कतिपयविषयान् प्रति सादृश्यस्य ध्यानं प्रददति स्म । यथा वरः वधूश्च सदृशः स्यात् । तयोः गुणाः, कर्माणि, स्वभावश्च मिलनात्मकाः स्युः । तयोः कुलस्य सदृशता, शीलस्वभावयोः सादृश्यं, शरीरस्य रूपस्य च सादृश्यं, आयुषः सादृश्यं, विद्यायाः सादृश्यं, धनस्य समानतादीनां विचारः भवतिस्म ।

आश्वलायनस्य गृह्यसूत्रानुसारं सर्वप्रथमं मातुः पितुश्च उभयोरपि कुलयोः परीक्षा भवेत् । यदि वरस्य वध्वाश्च द्वयोरपि पितृकुलां मातृकुलं च श्रेष्ठं भवेतदैव विवाहसम्बन्धं स्थापयेत् । आपस्तम्भगृह्यसूत्रानुसारं विवाहसम्बन्धस्य स्थापनसमये वरस्य परीक्षां कुर्यात् । सः पुरूषत्वगुणेन हीनः स्यात्, धीमान् जनप्रियश्च भवेत् । सहैव तस्य कृते इदमपि आवश्यकं आसीत् यत् तेन न्यूनातिन्यूतं ऋग्वेदस्य अध्ययनं सम्पूर्णतया कृतं स्यात् ।

यथा वरस्य परीक्षाविषये दर्शितं, तथैव वध्वाः अपि परीक्षायाः नियमोऽभवत् । वधूःवन्ध्यां न भूत्वा सन्तानमुत्पादयितुं समर्था भवेत्; सहिष्णुः मधुभाषिणी स्यात् । मनुस्मृत्यनुसारं तादृशीं स्त्रीं उद्वहेत् या कन्या पीतकेशवती न स्यात्, अधिकांगी न भवेत्, रूग्णा, रोमरहिता अधिकरोमवती न स्यात्, अधिकं वार्ताकारिणी न स्यात्, पीताक्षी न स्यात् तस्याः नाम नक्षत्र-वृक्ष-नदी-म्लेच्छ-पर्वत-पक्षि-सर्प-दासीपरकं न भवेत्, यस्याः नाम

सुन्दरं कथनसुखदं, गजगामिनी, सुक्ष्मलोमा, केशवती स्यात्, मधुरस्वभावा, लघुदन्ता, कोमलाङ्गी स्यात् – तादृशीं कन्यया सह विवाहं कुर्यात् ।

इत्थं विवाहसम्बन्धस्य स्थापनावसरे स्त्रियाः गुणं, रूपं, प्रज्ञां, वित्तं तथा बन्धुबान्धवादीनां सम्बन्धं पूर्णरूपेण विलोक्य तथा तयोः सादृश्यं दृष्टिसमक्षं निधाय एव विवाहसम्बन्धः वाञ्छनीयः मन्यते स्म । उपर्युक्तगुणरहिताया कन्यया सह विवाहं नाकरोत् ।

### ५.३.३ सगोत्र विवाह निषेधः

ऋग्वेदकाले सगोत्रविवाहः निषिद्धः आसीत् । यदि वरवध्वोः एकगोत्रः न स्यात्, अर्थात् यस्य जन्म एकस्मिन् कुले न स्यात्, एतादृशः विवाह योग्यः मन्यते स्म । अत एव भ्रातृभगिन्योः विवाहः निषिद्धः अभवत् । सदैव पितृस्वस्रीयः, मातुलेयः, पितृस्वस्रीयः बन्धुभगिन्योः अपि विवाहः नाभवत् । पाणिनीयानुसारं पौत्रादारभ्य या सन्तानपरम्परा भवति सः गोत्रः कथ्यते । अस्य सिद्धान्तस्यानुसारं समानगोत्रोत्पन्नाः सर्वे जनाः परस्पर भ्रातरः भगिन्यश्च भवन्ति, अतः सगोत्रविवाह न विदध्यात् ।

समानगोत्रे यथा विवाहः निषिध्यते, तथा एक प्रवरेऽपि विवाहनिषेधः मन्यते स्म । पूर्वपुरूषेषु येन मन्त्रद्रष्टारं भूत्वा वैदिकमन्त्राणां निर्माणं दर्शनं वा कृतं स्यात्, सः 'प्रवरः' उच्यते ।

इत्थं सगोत्रः सप्रवरश्च विवाहः न कुर्यात्, इदमपि धर्मशास्त्रीयं मतमस्ति । बोधायनस्य मतानुसारं सगोत्रकन्यया सह मातृवदाचरेत । ये लोकः इदमतिक्रमन्ते ते पापभागिनः भवन्ति ।

### ५.३.४ विवाहस्य प्रकाराः ।

प्राचीनकाले अष्टप्रकाराणां विवाहानामुल्लेख प्राप्यते, यत्र अग्रिमाःचत्वारः विवाहाः धर्मानुकुलाः उत्तमाश्च मन्यन्ते स्म । तथा शेषाः चत्वारः अधमाः सन्ति । अष्टौ प्रकाराः विवाहाः इत्थं सन्ति । यथा – ब्राह्मः, प्राजापत्यः, आर्षः, दैवः गान्धर्वः, आसुरः, राक्षसः तथा पैशाचः ।

समेषामेतेषां सम्यक्तया विवेचनं पूर्वगत प्रकरणे निरूपितमस्ति । विशेषमत्रेदं वर्तते । यत् – विवाहितायाः पत्न्याः पतिः कदापि त्यागं नाकरोत् । आपस्तम्बधर्मसूत्रानुसारं येन पतिना अन्यायेन स्वभार्यायाः त्यागः कृतः स्यात्, सः गर्दभस्य चर्म धारयित्वा प्रतिदिनं षण्मासं यावत्, सप्तगृहेषु भिक्षवृत्ति करोति स्मः तथा च वदति स्म यत् मया स्वपत्न्याः त्यागः कृतः । इत्थं करणेन तस्य प्रायश्चितमभवत् ।

#### ५.३.४.१ बहुपत्नी विवाहः ।

वैदिककाले बहुपत्नीविवाहस्य प्रथा प्रचलिता आसीत् नासीत् वेति विषये विदुषां विमतैक्यं वर्तते । ऋग्वेदे द्विभार्यस्य पुरूषस्य साम्यं द्विधुर्योः मध्ये अवरूद्धमश्वमिव दर्शितमस्ति । किन्तु ब्राह्मणग्रन्थनामनुसारं उत्तरवैदिककाले द्विपत्न्याः पद्धतिः प्रसिद्धासीत् । शतपथब्राह्मणानुसारं याज्ञवल्क्यस्य द्वे भार्ये आस्ताम्, मैत्रेयी कात्यायनी च । इत्थमुत्तरवैदिककालस्य नैकानि उदाहरणानि प्राप्यन्ते ।

#### ५.३.४.२ विधवाविवाहः

ऋग्वेदकाले विधवाविवाहस्य प्रथा आसीदिति अनुमन्यते, कथम् ? मन्त्रस्यैकस्यानुसारं पुत्रहीना विधवा स्वकीयेन देवा सह विवाहं कृत्वा

सन्तानमुत्पन्नं कर्तुं शक्नोति स्म । यथा –

कुह स्विददोषा कुह वस्तारश्विना[1]
कुहवाभिषित्वं करतः कुहोषत् ।
को वां शत्रुया विधवेव देवरं
मर्यं न योषाकुण्णुते सधस्थ आ ॥
ऋ.१०/४०/२

एतदतिरिक्तं सन्तानप्राप्तये 'नियोगः' अपि धर्मानुकूलः मन्यते स्म । महभारतानुसारं राज्ञः शान्तनोः पुत्रः चित्राङ्गादस्य विचित्रवीर्यस्य च मृत्योः पश्चात् तयोः पत्न्योः श्रीकृष्ण द्वैपायनव्यासेन नियोगेन सन्तानम् उत्पन्नमकारि ।

इत्थमस्माभिः दृश्यते यत् वैदिककाले भ्रातृभगिन्योः विवाहः सर्वथा निषिद्धः आसीत् । ऋग्वेदे यमी यमाय विवाहप्रस्तावमकरोत् । किन्तु यमेन स्पष्टमुक्तं यत् मद्भिन्नं कमपि शक्तिशालिनं समर्थपुरुषं पतिरूपेण प्राप्तं इच्छां कुरू ।

इत्थमत्रोपप्रकरणे विवाहस्य सामाजिकप्रभावः समाजनिर्माणं च कथं ? सम्भवति इति अत समीक्ष्य सविशदं निरूपितम् ।

## ५.४ वैदिकवाङ्मये नारीस्थानम् ।

### ५.४.१ ऋग्वेदोक्तनारीधर्माणां परिशीलनम् ।

समग्रस्य संसारस्य निरीक्षणं कृत्वा ज्ञानं भवति यत् सर्वासां सभ्यतानां च भारतीयार्यसभ्यतायाः स्थानं प्राचीनं विद्यते । भारतस्य मूलभूतं जीवनदर्शनं

१. ऋ.१०/४०/२

मान्यतानां सर्वप्रकारात्मकं वर्णनं अस्माकं ऋषिभिः क्रन्तदृष्टुभिः मुनिभिः कृतं विद्यते । एतत् मुनिभिः कृतं क्रान्तदर्शनं अद्यापि हिन्दुसंस्कृत्यै अपूर्वं फलां ददाति प्रेरणां च वितरति । तथापि विभिन्न-परिस्थितिषु भिन्न-भिन्नकाले आर्यसभ्यतायाः सिद्धान्तेषु विद्वांसः धर्मप्रणेतारः, देशकालानुसारेण कानिचित् परिवर्तनानि अपि अकुर्वन । किन्तु आर्यसंस्कृतेः मूलभूतेषु सिद्धान्तेषु काश्चन विशेषताः तादृश्यः आसन् याः अद्यापि भारतीयसंस्कृत्यै च विशेषं महत्वपूर्णं स्थानं च प्रददाति ।

अस्माकं भारतीयासंस्कृतिः अन्याभ्यः संस्कृतिभ्यः भिन्न विशिष्टा तत्तु सर्वदा सिद्धमेवास्ति । प्राचीनकालादेव संस्कृतौ नार्यस्थानं महत्वपूर्ण आसीत् अस्ति वा । कौटुम्बिकादर्शाः सामाजिकं जीवनं, राजनैतिकं महत्वमपि पिपुलं आसीत् । पुरूषेषु आत्मशक्तेः सम्पातः, सञ्चारः उत्कृष्टतया भवेत् तदर्थमपि सा नारी सदा सर्वदा यत्नशीला आसीत् । नारीणां काले काले तस्य उदाहरणानि दृष्टान्तानि-दत्तानि सन्ति यत् तया कदा कदा कं योगदानं दत्तं, तस्याः त्यागः कीदृशः आसीत् ? तपस्या कीदृशी आसीत् ? समाजस्य कुटुम्बस्य परवारस्य च रक्षणे संरचनायां सा कीदृशी कृतप्रयत्ना आसीत् तदपि प्राचीनेतिहासेन ज्ञानं भवति । भारतीय संस्कृतेः वैदिकसंस्कृतेः वा परिमाणं मूलयङ्कनं वा नारी मर्यादया एव भवति। भगवता मनुना स्वस्मृतौ अभिहितं यत् -

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रेतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रिया ॥

नारी संस्कृतेः एतत् उत्कृष्टं उदाहरणं विद्यते । वैदिक संस्कृत्यां कारणेनैव ततः प्रभृति अद्यावधि नार्यः प्रतिष्ठा सम्मानं वा एतावदस्ति ।

भारतीयज्ञानपरम्परायाः आध्यातिमक जगतः यदि कश्चित गुणनिधिः आसीत् वा यत्र सर्वविधजगतः प्रकाशः दृष्टिपथमवतरति चेत् सः अस्ति ऋग्वेदः । ऋग्वेदः अर्थात् धर्मस्य प्रत्यक्षदर्शनं स्वरूपं वा । ऋग्वेद मन्त्रसंख्या दश सहस्राधिका विद्यते च अत्र जगतः एकः अपि विषयः तादृशः नास्तियस्य ऋषिभिः मुनिभिः दर्शनं न कृतं स्यात् । ऋषयः मुनयः सदा सर्वदा मन्त्राणां मनने न स समाधौलग्नाः भवन्ति स्म । तथा च मननात् त्रायते इति मन्त्रः तस्य चिन्तनं सदा सर्वदा एतेषां हृदि चलति स्म । नारीणां यानि स्वरूपाणि सन्ति तानि सर्वाणि स्वरूपाणि धर्मव्यावख्यया अत्र प्रतिपादितानि सन्ति । समग्रस्य ऋग्वेदस्य आधारं गृहीत्वा नारीधर्माणां परिशीलनं क्रियते तदा तत्र सर्वस्वरूपाणां अध्ययनं उल्लेखः च अनिवार्यः भवति ।

सर्वेषां स्वरूपणां ऋग्वेदस्याधारेण क्रमः अवलोक्यते गुरूग्रन्थः भविष्यति किन्तु तथापि नारीधर्मपरिशीलनाय इदमित्थं विद्यते । यथा –

नारीशब्दः आगच्छति तदा कुत्र कुत्र ऋग्वेदे मन्त्रः निर्दिष्टः अस्ति तत् मण्डलाधारेण अवलोक्यते चेत् सुगमतया ज्ञानं भवति । तथा च सुस्पष्टं भवति । तथा च सुस्याहं भवति । अतः क्रमेण मण्डलानुसारेण ऋग्वेदोक्तनारीधर्माणां परिशीलनं कर्तव्यम् ।

### ५.४.२ वैदिकसमये नार्यः धार्मिकाधिकारः ।

वैदिकयुगे नार्यः पुरूषवदेव सर्वाः धार्मिकक्रियाः च कर्मणि यज्ञेषु व भागं गृहीतुं शक्ताः भवन्ति स्म । वैदिककाले काश्चत् नार्यः तु स्वतः एव यज्ञानुष्ठानानि कुर्वन्ति स्म । ऋग्वेदे एकस्मिन्स्थाने कन्यायाः तादृशं वर्णनं

सम्प्राप्यते यत् सा स्नानं कृत्वा सोमरसं गृहीत्वा गृहम् आगच्छति च साक्षात् यज्ञे इन्द्राय सोमरसं प्रहदाति । अन्यत्र एकस्मिन् स्थाने विश्वास नाम्नी कन्या प्रातः स्नात्वा स्वयमेव यज्ञकर्म आचरति । एवं प्रकारेण स्त्रीभिः अपि यज्ञकर्मणि आचर्यन्ते स्म । शुभकर्मसु वैदिककर्मसु वा निषेध न आसीत् सर्वप्रकारात्मिकः अधिकारः तस्याः आसीत् । नार्यः प्रातः सायं पुरूषवदेव ऋषिमुनिवदेव सन्ध्योपासनाम् अकुर्वन् । रामायणे अपि सीतया अपि सर्वविधधार्मिककर्तव्यानि समाचरितानि सन्ति ।

वैदिकसमये गृहस्थाश्रमस्य अीधकं महत्वं अस्ति । नारी धार्मिकक्रियासु सहायक । भवति स्म साधिकारपूर्वकमिति । स्वकुटुम्बपरिवारस्य याः रूढयः परम्पराः, संस्काराः आसन् तत्र नार्यः पूर्णतया प्रतिनिधित्वं करोति स्म । तथा च संस्कारादि सर्वकर्तव्येषु नार्यः तस्याः उपस्थितिः सर्वदा अनिवार्या भवति स्म । वैदिकसंस्कृतौ नारी विना पुरूषः सर्वदा अपूर्णः इति मन्यते स्म । यः पुरूषः यज्ञादिकर्मणि नारीं विना आहूति दातुं उपविशति वेत देवाः तस्य पुरूषस्य आहुतिं न स्वीकुर्वन्ति तादृशमपि मन्यते । यदि पुरूषः एकाकी यज्ञं करोति एवं स्वर्गप्राप्त्यै यत्नः करोति चेत् तत्र सः सफलो न भवति । यत्न्या नार्या वा सह यज्ञः भवति चेत् कर्म पूर्णं भवति एवं फलप्राप्तिर्भवति । यदा रामायणे रामः रावणवधान्ते अयोध्यायां सीतात्यागान्तरं यज्ञस्या योजनं करोति तदा सीतायाः सुवर्णप्रतिमां स्थापयति कारणं विना कर्माणि तदानीं अपि न भवन्ति सम । वैदिकसाहित्य कर्मणि वा यावत महत्वं पत्युः भवति तावदेव महत्वं पत्न्याः भवति ।

पुराकाले सामान्यतया पतिपत्नी साहचर्येणैव कर्माणि अकुर्वन् । तादृशानि बहूनि उदाहरणानि सन्ति यत्र दम्पती संयुक्ततया देवानां स्तुतिं कुर्वन्ति ।

सामाजिके धार्मिककर्मणि तत्सर्वेषु च नारी स्वतन्त्रतया, भागं गृहीतुं शक्ता भवति स्म ऋग्वेदे तादृशमपि वर्णनं सम्प्राप्यते यत् नार्यः अलङ्काराणि धृत्वा यज्ञकर्म गच्छान्ति स्म । शतपथब्राह्मणे विदुष्यः नार्यः सभायां समुपस्थिताःभवेयुः तदर्थं, निमन्त्रणव्यवस्था आसीत् । यजुर्वेदेऽपि पतिना पत्न्या सह एव यज्ञः कर्तव्यः तादृशं प्रतिपादितं विद्यते । यज्ञभूमौ पत्न्याः स्वतन्त्रोऽधिकारः आसीत् । पत्न्या यज्ञस्य अनेकाः क्रियाः क्रियमाणाः आसन् । वैदिकयुगे प्रारम्भे ताः सामगानस्य कार्यमपि कुर्वन्ति स्म । कालानन्तरं सामगानस्य कार्यं उद्गातृभ्यः प्रदत्तम् ।

एवं प्रकारेण वैदिकयुगे नार्यः महत्वपूर्णं स्थानं आसीत् । पत्नीं विना यज्ञः अपूर्णः पत्नीं विना सः यज्ञंकर्तुं अपि असमर्थः, तादृशी परम्परा वैदिक कालादेव आसीत् ।

वैदिककाले पत्न्याः सामाजिका स्थितिः उन्नता आसीत् । पतिः पत्नी संयुक्तरूपेण कौटुम्बिकसम्पत्तेः अधिकारः आसीत् । कुत्रचित् स्थानेषु यदि काचित् विधवा नारी अस्तिचेत् तस्यै धनं दातव्यं तदपि कथितम् । नारी स्वयमपि स्व-संगृहीतधनात् ब्राह्मणेभ्यः दानं दातुं समर्था शक्ता च भवति स्म । वैदिक समयस्योत्तरार्धे हिन्दुनारीणां धनाय कतिपय अधिकाराः लुप्ताः न्यूनाः च जाताः इति ।

### ५.४.३ वैदिककाले शिक्षायां नार्यः योगदानम् ।

ऋग्वेदः संसारस्य प्राचीनतमः ग्रन्थः विद्यते । अस्य ग्रन्थस्य अनुशीलनेन ज्ञातं भवति यत्, वैदिककाले नार्यः उच्चशिक्षाप्राप्त्यै स्वतन्त्राः आसन्, ताः वेदाध्यायनं कर्तुं शरना भवन्ति स्म । काव्यादि निर्माणकर्मणि अपि तस्याः

प्रावीण्यं अधिकार श्वासीत् ।

ऋग्वेदस्य कतिपयेषु मन्त्रेषु सप्तविंशतिः ब्रह्मवादिन्यः स्त्रियः आसन तस्य नामोल्लेखः संप्राप्यते । शौनकेन स्वग्रन्थे बृहद्देवताय; मन्त्रद्रष्टारः नार्यः आसन् तस्यापि उल्लेखः कृतः विद्यते । ऋग्वेदस्य अनेकानां सूक्तानां ऋषिकाः स्त्रियः सन्ति । उदाहरणरूपेण यथा – सूर्या नाम्ना ऋषिका ऋग्वेदस्य दशममण्डले पञ्चाशितितमं सूक्तं दृष्टं वा साक्षात्कारं कृतं तथा च इन्द्राणि अपि ऋग्वेदस्य दशमे मण्डले पञ्चचत्वारिं शदधिकशततमस्य सूक्तस्य साक्षात्कारः कृतं लोपामुद्रा स्वपतिना अगस्त्येन सह सूक्तस्य दर्शनं करोति ततः रोमशा ऋग्वेदस्य १/२७/७ मन्त्रस्य, विश्ववारा ५/२८/ मन्त्रस्य शची १/१५९, मन्त्रस्य अपाला च ९/५९ मन्त्रस्य ऋषिका अस्ति । ततोप्यधिकम् उषा, अदिति, विश्पला, सिकता, सर्पराज्ञी, ममता, यमी, उर्वशी, श्रध्ध, आदयः नार्यः ज्ञानसाधनो पासनाया उच्चं स्थानं प्राप्तव्यः ।

सांख्यशास्त्रस्य प्रणेता कपिलमुनिः तेषां माता देवहूतिः अपि स्वपुत्रादेव अध्यात्मज्ञानं प्राप्तवती । पुत्राश्रयेण अध्यात्मज्ञानेन च सा मोक्षं प्राप्तवती । अनेन स्पष्टं भवति ऋग्वेदानन्तरं उपनिषदकाले । पि नारीभिः मोक्षद्वाराणि उद्घाटितानि आसन् । तस्मिन् समये नार्यः आत्मसाक्षात्काराय उत्थिता भवति स्म । तस्य प्रमाणं मैत्रेयी आत्मज्ञानाय जिज्ञासां धारयति तत् सर्वविदितमस्ति । आत्मज्ञानस्य जिज्ञासा तावती आसीत् येन सा स्वपत्युः सम्पत्तिमपि नेच्छति, तृणमिव तस्याः त्यागं करोति । स्वपतिना याज्ञवल्क्येन सह सा आत्मज्ञानस्य प्रबलेच्छया सर्वं त्यक्तुं समर्था भवति, अनेन सिद्धं ज्ञानं च भवति यत् नार्यः शिक्षाक्षेत्रेऽपि अत्युच्चतमं स्थानं मानं च प्राप्नुवन्ति स्म । महाभारतस्य सुलभा तथा रामायणस्य आत्रेयी स्वे स्वे युगे अध्यात्मसा धनायां विख्याता जाता ।

राज्ञः जनकस्य सभायां गार्गी याज्ञवल्क्याय प्रश्नान् पृच्छाति च द्वित्राः अपि प्रश्नान् श्रुत्वा मुक्ताः भवन्ति स्म, आश्चर्यचकिताः भवनित स्म । स्वातन्त्र्येण अध्यात्मसाधनायां सफलता प्राप्ता ।

**५.४.४ वैदिकसमये राजनीतौ नार्यः योगदानम् ।**

वैदिकनारीणां भारतीयनारीणां कठिन समये क्लिष्टकाले परिस्थितिषु अपि स्वसाहसं न त्यक्तं स्वशौर्यस्य परिचयः प्रदत्तः विद्यते । वैदिकनारीणां – साहसं, शौर्यः, पराक्रमं अपि तादृशं आसीत् यत् भारतीयः इतिहासः न कदापि विस्मरिष्यति । युद्धात् पराभवं प्राप्य यदि पतिः आगच्छति चेत नारी तंत्र शौर्यसञ्चारं, वीरविचारान्, आरोपयन्ति स्म । समरेषु पतिः यदा नैराश्यं प्राप्तोति तदा चातुर्यंपूर्णान् विचारान् सा श्रावयति नैपथ्ये उपविश्य तत्कालीना नारी सुराज्यं स्थाययितुं स्वपतिना सह तिष्ठति स्म । वैदिकयुगे नारीणां राजनैतिकं विषयकं योगदानं सविशेषतया न लभ्यते, किन्तु तथापि एतस्मिन् क्षेत्रेऽपि नारी पृष्ठे नासीत् तस्य प्रमाणं तु लभ्यते एव ।

ऋग्वेदे तादृशः उल्लेखः प्राप्यते यत्र नारीसेना नमुचिनाम्नः नृपः आसीत तेन इन्द्रेण सह युद्धं कर्तव्यमासीत् तदर्थं काल धर्मानुसारेण नार्यः शास्त्राणि धारयन्ति स्म । भारतीय सैन्यपरम्परायां तादृशमपि ज्ञातं भवति यत् सेनायां नारीणामपि समावेशः भवति स्म । 'अबलासेना' नाम्ना तस्य अभिधानं गणना भवति स्म । नार्यः अपि अस्त्र–शस्त्रज्ञानाय अग्रेसरः उत्साहपूर्णाः वीराः च भवन्ति स्म । समयानुसारेण कालक्रमेण ताः एतस्थाः अस्त्र शास्त्रविद्यायाः प्रयोगमपि अकुर्वन् । कदाचित् तु तादृशमपि भवति स्म यत् नार्यः पुरुषैः सह युद्धे प्रतिबद्धा भवन्ति स्म ।

ऋग्वेदस्य अगस्त्यस्य पुरोहितः खेलऋषेः पत्नी विश्पला स्वपतिना सह

युद्धं गच्छाति । तत्र तस्या: शरीरं खण्डितं भवति तथा अश्विनिकुमारौ पीठा निवारणं करोति । मुद्गला नाम्नी नारी स्वशत्रुभि: सह युद्धं करोति सहस्रगा: संप्राप्नोति । पुत्रासुरस्य माता दनुं स्वपुत्रै: सह मुद्धाय गच्छति स्म । इन्द्र: च तस्या: वधं करोति । देवासुरसंग्रामे इन्द्रस्य सहामतायै युद्धकरणे नृपस्य दशरथस्य पत्नी कैकेयी अपि सहायतामकरोत् ।

एवं प्रकारेण भारतीय राजनीते: इतिहासे वीराङ्गनानां वार्ता: प्रसङ्गश्च समुपलभ्यन्ते । नार्य: चरित्राणि मर्यादाशीलं, कर्तव्यनिष्ठं, न्यायप्रियं, ओजस्वीपूर्ण:, तेजस्वीपूर्णं, शौर्यपूर्ण: जीवन चरित्राणि, च भारतीयेतिहासस्य वैदिकेतिहासस्य गौरवं वर्धयति । स्त्रिय: माता, स्वसा, पत्नी, पुत्रीरूपेण वा पुरूषेषु शौर्यं सिञ्चति स्म् सिग्धति च ।

वैदिकसाहित्यस्याध्ययनेन ज्ञानं भवति यत् प्राचीन भारतीय नारीणां सर्वस्वरूपेषु सात्विकता आसीत् । एका सौम्यता आसीत् दिव्यता आसीत् येन समाज: विभूषित: अभवत् भवति च । अनेन सह दु:खस्यापि एका वार्ता यत् अद्यतनीया कृत्रिमसभ्यता नारीणां तप:पूर्णं स्वभावं सायामोहितं कृत्वा कहुतया स: अधिकार: ताभ्य: पुन: स्वीकृत: । तथा च नारीणां संसारस्य बाह्याकर्षणेभ्य: आच्छन्ना भूत्वां स्वां विस्मारिता । अद्यापि शिक्षणे नारीणां सर्वोच्चस्थानं विद्यते । विज्ञानक्षेत्रेऽपि सा कार्यरता विद्यते । व्यापारक्षेत्रे राजकीयक्षेत्रे संसदीयक्षेत्रे नारीणां स्वस्थानं पूर्ववदेव निर्मितं विद्यते सर्वविधक्षेत्रेषु – दाक्षिण्यं प्रावीण्यं साफल्यं च संप्राप्तं विद्यते । नारीणा तत् दर्शितं विद्यते यत् वैदिक कालवदेव आधुनिकनार्य: बालविवाहप्रथा, सतीप्रथा, विवाहकालिका धनवैभवप्रथा, असमानता, भ्रूणहत्या, इत्यादिभि: कारणै:, मुक्ता भाव्य दूरे च स्थातव्यं तदर्थं वैदिक–साहित्यस्य निरन्तरमभ्यास: अनिवार्य इति ।

एवं प्रकारणे सीतायाः शीलम, द्रौपद्याः त्यागभागना, उर्मिलायाः त्यागः, गान्धार्य्याः नैत्रदानम्, सावित्री तपस्या, अनसूयायाः शक्तिः, गार्ग्याः वैदुष्यम्, स्तुलोचनायाः नैत्रदानं, अरुन्धत्याश्च सेवापरायणता अद्यापि अनन्यादर्शरूपेण परिगण्यते अद्यापि स्मर्यते । इमाः च वैदिकसंस्कृतेः इतिहासस्य च आदर्शप्राणभूताः इति ।

इत्थमत्र वैदिकवाङ्मये सामाजिक संरचना कीदृशी आसीदिति, समाजव्यवस्था, आश्रमव्यवस्था, विवाहद्वारा पारिवारिक व्यवस्था, नारीस्थनंमित्यादिभिः विचारैः सम्यक्तया समीक्ष्य निष्कर्षभूतं तथ्यमत्र सविशदं वर्णितम् । चेदत्र किमपि न्यूनत्वं तत् शिष्यभावात् क्षन्तव्यम् ।